# श्री मीनांबिका स्तोत्रम्

श्रीविद्ये शिववामभागनिलये श्रीराजराजार्चिते
श्रीनाथादिगुरुस्वरूपविभवे चिन्तामणीपीठिके ।
श्रीवाणीगिरिजानुतांघ्रिकमले श्रीशांभवी श्रीशिवे
मध्याह्ने मलयध्वजाधिपसुते मां पाहि मीनांबिके ॥१॥

चक्रस्थे चपले चराचरजगन्नाथे जगत्पूजिते
आर्त्तालीवरदे नताभयकरे वक्षोजभारान्विते ।
विद्ये वेदकलापमौलिविदिते विद्युल्लताविग्रहे
मातः पूर्णसुधारसार्द्रहृदये मां पाहि मीनांबिके ॥२॥

कोटीरांगदरत्नकुण्डलधरे कोदण्डबाणाञ्चिते
कोकाकारकुचद्वयोपरिलसत् प्रालंबिहाराञ्चिते ।
शिञ्चिन्नूपुरपादसारसमणी श्रीपादुकालंकृते
मद्दारिद्र्यभुजंगगारुडखगे मां पाहि मीनांबिके ॥३॥

ब्रह्मेशाच्युतगीयमानचरिते प्रेतासनान्तस्थिते
पाशोदङ्कुशचापबाणकलिते बालेन्दुचूडाञ्चिते ।
बाले बालकुरङ्गलोलनयने बालार्ककोट्युज्ज्वले
मुद्राराधितदैवते मुनिसुते मां पाहि मीनांबिके ॥४॥

गन्ध्रवामरयक्षपन्नगनुते गङ्गाधरालिङ्गिते
गायत्रीगरुडासने कमलजे सुश्यामळे सुस्थिरे ।
खातीते खलदारुपावकशिखे खद्योतकोट्युज्ज्वले
मन्त्राराधितदैवते मुनिसुते मां पाहि मीनांबिके ॥५॥

नादे नारदतुंबुराद्यविनुते नादान्तनादात्मिके
नित्ये नीललतात्मिके निरुपमे नीवारशूकोपमे ।
कान्ते कामकले कदंबनिलये कामेश्वराङ्कस्थिते
मद्विद्ये मदभीष्टकल्पलतिके मां पाहि मीनांबिके ॥६॥

वीणानादनिमीलितार्द्धनयने विस्रस्तचूळीभरे
तांबूलारुणपल्लवाधरयुते ताटङ्कहारान्विते ।
श्यामे चन्द्रकलावतंसकलिते कस्तूरिकाफालिके
पूर्णे पूर्णकलाभिरामवदने मां पाहि मीनांबिके ॥ ७॥

शब्दब्रह्ममयी चराचरमयी ज्योतिर्मयी वाङ्मयी
नित्यानन्दमयी निरञ्जनमयी तत्वन्मयी चिन्मयी ।
तत्वातीतमयी परात्परमयी मायामयी श्रीमयी
सर्वैश्वर्यमयी सदाशिवमयी मां पाहि मीनांबिके ॥ ८॥

। इति श्रीमद् शङ्करभगवद्पादाचार्यविरचितं
श्री मीनांबिका स्तोत्रम् ।